२५

346sk25

सन्नन्तप्रकरणम्

प्रस्तावना

सन् इति एकः प्रत्ययः। सन् अन्ते यस्य धातोः स धातुः सन्नन्तो भवति । तेषां धातूनां प्रकरणम् व्याकरणे सन्नन्तप्रकरणम् इति शब्देन व्यवह्रियते। सन्नन्तधातुः भ्वादिधातुभ्यः पृथक् कश्चित् धातुः नास्ति, अपि तु भ्वादितः चुरादिं यावत् ये दशगणीया धातवो वर्तन्ते तेभ्य एव परं यदा इच्छार्थे सन्प्रत्ययो भवति तदा ते एव धातवः सन्नन्तरूपतां लभन्ते। तेषां च सन्नन्तशब्दानां सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञा भवति। यथा पठ व्यक्तायां वाचि इति भ्वादिगणीयो धातुः वर्तते, तस्मात् धातोः परं यदा सन्प्रत्ययो भवति तदा सः पिपठिष इति नूतनरूपतां लभते, स च सन्नन्तधातुरित्युच्यते। एवञ्च पिपठिष इति सन्नन्तस्य धातुसंज्ञा सनाद्यन्ता धातव (३.१.३२) इत्यनेन भवति, तस्य मूलस्य पठ् इत्यस्य तु भूवादयो धातव (१.३.१) इत्यनेन धातुसंज्ञा इति पार्थक्यं सम्यक् विज्ञेयम्।

उद्देश्यानि

इमं पाठं पठित्वा भवान् –

- सन्नन्तधातोः कथं निष्पत्तिर्भवति इति ज्ञास्यति।
- सन्प्रत्ययविधायकसूत्रस्य अर्थमधिगमिष्यति।
- पिपठिषतीति रूपसिद्धिं ज्ञास्यति तज्ज्ञात्वा च अन्यदपि रूपं साधयितुं शक्ष्यति।
- सनि परतः तत्तत्स्थलेषु कानिचित् विशेषकार्याणि भवन्ति, तज्ज्ञास्यति।
- लोकव्यवहारोपयोगिशब्दानां प्रक्रिया अपि तत्तत्सूत्रेषु दत्ताः सन्ति, तज्ज्ञास्यति।

[२५.१] सनाद्यन्ता धातवः॥ (३.१.३२)

सूत्रार्थः– सनादयः णिङन्ताः प्रत्ययाः अन्ते येषां ते धातुसंज्ञकाः भवन्ति।

सूत्रव्याख्या– संज्ञासूत्रेऽस्मिन् पदद्वयमस्ति। सनाद्यन्ताः (१/३), धातवः (१/३) इति सूत्रगतपदच्छेदः। सन् आदिः येषां ते सनादयः इति बहुव्रीहिसमासः। सनादयः अन्ते येषां ते सनाद्यन्ताः इति बहुव्रीहिसमासः।

सन्–क्यच्–काम्यच्–क्यङ्–क्यषोऽथाचारक्विब्–णिज्–यङस्तथा।

यगायेयङ्–णिङ् चेति द्वादशाऽमी सनादयः।।

सन् क्यच् काम्यच् क्यङ् क्यष् आचारक्विप् णिच् यङ् यक् आय ईयङ् णिङ् इति एषाम् आदिः सन् अस्ति। अतः एते सनादयः। एते यस्य अन्ते भवन्ति स सनाद्यन्तः भवति। यथा कमेर्णिङ् इति सूत्रेण कम्–धातुतः णिङ् प्रत्ययः विधीयते। तदा कम्+णिङ् इति जाते प्रक्रियया कामि इति शब्दः निष्पद्यते। अस्य अन्ते णिङ् अस्ति। अतः अयं सनाद्यन्तः शब्दः। तस्य अनेन सूत्रेण धातुः इति संज्ञा विधीयते। सनादयः णिङन्ताः प्रत्ययाः अन्ते येषां ते धातुसंज्ञकाः भवन्तीति सूत्रस्यास्यार्थः।

[२५.२] धातोः कर्मणः समानकर्तृकादिच्छायां वा॥ (३.१.७)

सूत्रार्थः– इषिकर्मण इषिणैककर्तृकाद्धातोः सन्प्रत्ययो वा स्यादिच्छायाम्।

सूत्रव्याख्या – विधिसूत्रेऽस्मिन् पञ्च पदानि सन्ति। धातोः (५/१), कर्मणः (५/१), समानकर्तृकात् (५/१), इच्छायाम् (७/१), वा (अव्ययम्) इति सूत्रगतपदच्छेदः। समानः कर्ता यस्य सः समानकर्तृकः इति बहुव्रीहिसमासः, तस्मात् समानकर्तृकात्। गुप्तिज्किद्भ्यः सन् (३.१.५) इत्यतः सन् इति पदम् अनुवर्तते।

इष्–धातोः अर्थः इच्छा, अतः इष्–धातुः इच्छार्थकोऽस्ति। तस्य च इष्धातोः कर्म अस्ति यो धातुः अर्थात् इच्छार्थक–इष्धातुकर्मीभूतात् धातोः, किञ्च इच्छायाः यः कर्ता सैव कर्ता यस्य धातोः, तादृशधातोः अर्थात् इच्छासमानकर्तृकात् धातोः परं सन्प्रत्ययो भवति इच्छार्थे। स च प्रत्ययो विकल्पेन विधीयते। एवञ्च कस्माच्चित् धातोः परं तदैव सन्प्रत्ययो भवति यदा इमौ विषयौ तत्र वर्तेयाताम्। प्रथमं हि यस्माद्धातोः परं सन्प्रत्ययो भवति अवश्यमेव स धातुः इष्धातोः कर्म भवेत्। अपरं तु इष्–धातोः यः कर्ता सैव कर्ता इष्धातुकर्मीभूतधातोरपि भवेत्। पश्यतु – देवदत्तः पठितुम् इच्छति इत्यत्र इष्धातोः यः कर्ता (देवदत्तः) सैव कर्ता पठ्धातोरपि। किञ्च, पठ्धातुः इष्धातोः कर्मापि अस्ति। अतः पठ्धातोः सन्प्रत्ययो विधीयते चेत् पिपठिषति इति रूपं भवति। सूत्रेऽस्मिन् विकल्पार्थकवा–ग्रहणात् विकल्पेन सन् प्रत्ययो विधीयते अतः सन्प्रत्ययाभावे पठितुम् इच्छति इति वाक्यमपि साधु भवति।

उदाहरणम् – पिपठिषति।

सूत्रार्थसमन्वयः – पठितुम् इच्छति इति विग्रहे पठ्धातोः धातोः कर्मणः समानकर्तृकादिच्छायां वा इति सूत्रेण सन्प्रत्ययो भवति। यतः इष्धातोः यः कर्ता सैव कर्ता पठ्धातोरपि अस्ति किञ्च पठ्धातुः इष्धातोः कर्मापि अस्ति। ततः सनः नकारस्य हलन्त्यमिति सूत्रेण इत्संज्ञायां तस्य लोपः इत्यनेन लोपे पठ् स इति जाते धातोः इत्यधिकारे सन्प्रत्ययस्य पठितत्वात् धातोः विहितत्वात् च आर्धधातुकं शेषः इत्यनेन सनः आर्धधातुकत्वे आर्धधातुकस्येड्वलादेः इत्यनेन इडागमे अनुबन्धलोपे च पठ् इस इति जाते अग्रिमसूत्रमारभ्यते–

[२५.३] सन्यङोः॥ (६.१.९)

सूत्रार्थः – सन्नन्तस्य यङन्तस्य च प्रथमैकाचो द्वे स्तः अजादेस्तु द्वितीयस्य।

सूत्रव्याख्या – विधिसूत्रमिदं एकपदात्मकमस्ति। सन्यङोः इति षष्ठीद्विवचनान्तम्। सन् च यङ् च तयोः इतरेतरयोगद्वन्द्वे सन्यङौ, तयोः सन्यङोः। एकाचो द्वे प्रथमस्य इति अजादेर्द्वितीयस्य इति च सूत्रे अधिक्रियेते। सन् यङ् इत्युभौ प्रत्ययौ। अतः प्रत्ययग्रहणे तदन्ता ग्राह्याः इति नियमेन सन् इत्यनेन सन्नन्तं गृह्यते, यङ् इत्यनेन च यङन्तं गृह्यते। सन्नन्तस्य यङन्तस्य च प्रथम–एकाच्–भागस्य द्वित्वं भवति यदि धातुः अजादिर्भवति तर्हि द्वितीय–एकाच्–भागस्य द्वित्वं भवति इति सूत्रस्य अर्थः। अर्थात् हलादिधातुषु प्रथमैकाचो द्वित्वं भवति, अजादिधातुषु तु द्वितीयैकाचो द्वित्वम् इति पार्थक्यम्। एवञ्च सूत्रेणानेन द्वित्वं विधीयते।

अत्र विशेषः – सन्नन्तरूपस्य कृते आदौ सन्प्रत्ययस्य निर्णयः करणीयः। ततः इड्विषये चिन्ता कार्या। यदि मूलधातुः सेट् भवति तर्हि इड्भवति। अन्यथा न। सन् आर्धधातुकप्रत्यय इति न विस्मर्तव्यम्। इड्विधानात्परं सन्नन्तसमुदायस्य धातुसंज्ञां कृत्वा द्वित्वविधानं मुख्यं कार्यम्। यदि मूलधातुः परस्मैपदी भवति तर्हि सन्नन्तात् परमपि परस्मैपदमेव भवति। किञ्च यदि मूलधातुः आत्मनेपदी भवति तदा सन्नन्तात् परमपि आत्मनेपदमेव भवति।

उदाहरणम् – पिपठिषति।

सूत्रार्थसमन्वयः – तथा च पठ् इ स इति स्थिते सन्यङोः इत्यनेन प्रथमैकाचः पठ् इत्यस्य द्वित्वं भवति। यतः पठ्धातुः हलादिः अस्ति। ततः पठ् पठ् इ स इति जाते पूर्वोऽभ्यास इत्यनेन प्रथमस्य पठ् इत्यस्य अभ्याससंज्ञायां हलादिः शेषः इत्यनेन हलादिशेषे अर्थात् प्रथमठकारस्य लोपे पपठ् इस इति जायते। ततः सन्यतः इत्यनेन अभ्याससंज्ञकप्रथम–पकारात् परस्य अकारस्य इकारादेशे पिपठ् इ स इति जाते द्वितीय–इकारात् परस्य सकारस्य आदेशप्रत्यययोः इत्यनेन षत्वे पिपठ इ ष इति जाते वर्णसम्मेलने च पिपठिष इति जायते। ततः अस्य समुदायस्य सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञा भवति। ततः लट्लकारस्य प्रथमपुरुषैकवचनविवक्षायां तिपि शपि अनुबन्धलोपे पिपठिष अ ति इति स्थिते अतो गुणः इत्यनेन पररूपे पिपठिषति इति रूपं सिध्यति। एवमेव भवितुम् इच्छति इत्यर्थे बुभूषति इत्यादिरूपं साधयितुं शक्ष्यति।

अत्तुम् इच्छति इत्यर्थे अद्–धातोः सन्प्रत्यये लुङ्सनोर्घस्लृ इत्यनेन घस्लृ इत्यादेशे घस् स इति स्थिते सूत्रमिदं प्रस्तूयते–

[२५.४] सः स्यार्धधातुके॥ (७.४.४९)

सूत्रार्थः – सस्य तः स्यात् सादावार्धधातुके।

सूत्रव्याख्या – विधिसूत्रमिदं पदत्रयात्मकमस्ति। सः (६/१), सि (७/१) आर्धधातुके (७/१) इति सूत्रगतपदच्छेदः। अच उपसर्गात्तः इत्यतः तः इत्यस्यानुवृत्तिर्भवति। तकारात् अकारः उच्चारणार्थः। सि इति आर्धधातुके इत्यस्य विशेषणमस्ति। अतः यस्मिन् विधिस्तदादावल्ग्रहणे इति

परिभाषया तदादिविधौ सकारादौ आर्धधातुके इत्यर्थो लभ्यते। एवञ्च सकारादौ आर्धधातुके परे सकारस्य स्थाने तकारादेशो भवति इति सूत्रार्थः फलति।

उदाहरणम् – जिघत्सति।

सूत्रार्थसमन्वयः – एवञ्च घस् स इत्यत्र आर्धधातुकः सकारो विद्यमानः। अतः प्रकृतसूत्रेण सकारस्य स्थाने तकारादेशे घत्स इति भवति। ततः प्रथम–एकाज्भागस्य सन्यङोः इत्यनेन द्वित्वे घत् घत् स इति जायते। ततः हलादिशेषे घ घत् स इति जाते प्रथमघकारस्य चर्त्वे झकारे अभ्यासे चर्च इत्यनेन जश्त्वे जकारे सन्यतः इत्यनेन जकारात् परस्य अकारस्य इत्वे जिघत्स इति जायते। ततः लटि तिपि शपि पररूपैकादेशे जिघत्सति इति रूपं सिध्यति।

कर्तुम् इच्छति इत्यर्थे डुकृञ् करणे इति धातोः धातोः कर्मणः समानकर्तृकादिच्छायां वा इति सूत्रेण सन्प्रत्यये कृ स इति स्थिते सनः आर्धधातुकत्वात् इडागमे प्राप्ते तं बाधते एकाच उपदेशेऽनुदात्तात् इति योगः। ततः दीर्घविधानार्थं शास्त्रमिदमारभ्यते –

[२५.५] अज्झनगमां सनि॥ (६.४.१६)

सूत्रार्थः – अजन्तानां हन्तेरजादेशगमेश्च दीर्घो झलादौ सनि।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। अज्झनगमाम् (६/३), सनि (७/१) इति सूत्रगतपदच्छेदः। अच् च हन् च गम् च तेषामितरेतरयोगद्वन्द्वे अज्झनगमः, तेषाम् अज्झनगमाम्। नोपधाया इत्यतः उपधाया इति पदस्य, अनुनासिकस्य क्विझलोः क्ङिति इत्यतः झलि इत्यस्य, ढ्रलोपे पूर्वस्य दीर्घोऽणः इत्यतः दीर्घ इति पदस्य च अनुवृत्तिर्भवति। अङ्गस्य इत्यधिक्रियते। अच् इति अङ्गस्य विशेषणं भवति इत्यतः तदन्तविधौ अजन्तस्य अङ्गस्य इत्यर्थो लभ्यते। झलि इति सनि इत्यस्य विशेषणम्। अतः तदादिविधौ झलादौ सनि इत्यर्थो भवति। इङश्च इत्यनेन विहितस्य अजादेशस्य गम्–धातोरेव स्वीकारः न तु गम्लृ गतौ इति धातोः। यत्र दीर्घादिः विधीयते तत्रैव अचश्च इति परिभाषया अचः स्थाने इत्यर्थो लभ्यते। अनुवृत्त्या लब्धस्य उपधायाः इत्यस्य हन्–गम्–धातुभ्यामेव सह अन्वयो भवति न तु अचा सह, यतो हि अजन्तधातुषु दीर्घयोग्यः उपधावर्णो नास्ति। एवञ्च सूत्रार्थस्तावत् – अजन्तधातोः, हन्धातोः किञ्च अजादेशगम्धातोः अचः स्थाने दीर्घ आदेशो भवति झलादौ सनि परे।

उदाहरणम् – चिकीर्षति।

सूत्रार्थसमन्वयः – एवञ्च कृ स इत्यत्र इण्निषेधे सन् झलादिरस्ति किञ्च अत्र कृ इति अजन्तम् अङ्गम् अपि अस्ति। अतः प्रकृतसूत्रेण दीर्घे कृ स इति जायते।

एवञ्च कृ स इति स्थिते सनः आर्धधातुकत्वात् सार्वधातुकार्धधातुकयोः इत्यनेन गुणे प्राप्ते सूत्रमिदमारभ्यते–

[२५.६] इको झल्॥ (१.२.९)

सूत्रार्थः – इगन्ताज्झलादिः सन् कित् स्यात्।

सूत्रव्याख्या – अतिदेशसूत्रमिदं पदद्वयात्मकम्। इकः (५/१), झल् (१/१) इति सूत्रगतपदच्छेदः। असंयोगाल्लिट्कित् इत्यतः कित् इति पदस्य , रुदविदमुषग्रहिस्वपिप्रच्छः संश्च इत्यतः सन् इति पदस्य चानुवृत्तिर्भवति। सन्प्रत्ययः धातोरेव विधीयते अतः सन् इत्यनेन धातुः आक्षिप्यते। आक्षिप्तस्य च धातोः इति विशेष्यस्य विशेषणम् इकः इति । ततः तदन्तविधौ इगन्तात् धातोः इत्यर्थो लभ्यते। किञ्च झल् इत्यस्य विशेषणं सन् इति। अतः तदादिविधौ झलादौ सनि इत्यर्थो लभ्यते। एवञ्च इगन्तधातोः परस्य झलादिसन्प्रत्ययस्य किद्वद्भावो भवति इति सूत्रार्थः। तथा च सूत्रेणानेन किद्वद्भावो विधीयते। किद्वद्भावस्य तु प्रयोजनं गुणनिषेधः।

उदाहरणम् – चिकीर्षति।

सूत्रार्थसमन्वयः – एवञ्च कृ स इति स्थिते प्रकृतसूत्रेण कित्त्वं भवति। यतो हि कृ इति इगन्तधातुः अस्ति। किञ्च स इति झलादिः सन् अस्ति। तथा च कित्त्वात् क्ङिति च इत्यनेन गुणनिषेधे ऋत इद्धातोः इत्यनेन ऋकारस्य इत्वे रपरत्वे हलि च इत्यनेन उपधादीर्घे आदेशप्रत्यययोः इत्यनेन सकारस्य षत्वे कीर्ष इति जायते। ततः सन्यङोः इत्यनेन सन्नन्तधातोः प्रथमैकाचः कीर् इत्यस्य द्वित्वे हलादिशेषे ह्रस्वे कुहोश्चुः इत्यनेन ककारस्य स्थाने चवर्गादिशे चकारे चिकीर्ष इति सन्नन्तरूपं भवति। ततः सनाद्यन्ता धातव (३.१.३२) इत्यनेन तस्य धातुसंज्ञायां लटि प्रथमपुरुषैकवचनविवक्षायां तिपि शपि पररूपे चिकीर्षति इति रूपं सिध्यति।

कर्त्रभिप्राये क्रियाफले तु आत्मनेपदप्रत्यये चिकीर्षते इति रूपं भवति।

पाठगतप्रश्नाः-१

१. पिपठिषति इत्यत्र मूलधातुः कः सन्नन्तधातुश्च कः।

२. पिपठिषति इत्यत्र सन्नन्तस्य धातुसंज्ञा केन भवति।

३. सन्प्रत्ययः कस्मिन्नर्थे भवति।

४. सन्धातुः किं नित्यं भवति।

५. पिपठिषति इत्यस्य इत्यस्य कोऽर्थः।

६. सः स्यार्धधातुके इत्यस्य उदाहरणं किम्।

७. चिकीर्षति इति दीर्घः केन।

८. सनः किद्वद्भावस्य एकं प्रयोजनं लिखत।

९. के सनादयः इति लिखत।

१०. भवितुमिच्छति इत्यर्थे किं रूपं भवति।

भवितुम् इच्छति इत्यर्थे भूधातोः सन्प्रत्यये भू स इति स्थिते भूधातुः ऊदन्तत्वात् सेट् अस्ति इति कृत्वा सनः आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इत्येन इडागमे प्राप्ते निषेधसूत्रमिदमारभ्यते –

[२५.७] सनि ग्रहगुहोश्च॥ (७.२.१२)

सूत्रार्थः – ग्रहेर्गुहेरुगन्ताच्च सन इण्न स्यात्।

सूत्रव्याख्या – निषेधसूत्रमिदं पदत्रयात्मकम्। सनि (७/१), ग्रहगुहोः (६/२) च (अव्ययम्) इति सूत्रगतपदच्छेदः। ग्रहश्च गुह् च तयोरितरेतरयोगद्वन्द्वे ग्रहगुहौ, तयोर्ग्रहगुहोः, पञ्चम्यर्थे षष्ठी। नेड् वशि कृति इत्यतः न, इट् इत्यनयोरनुवृत्तिर्भवति। चकारेण श्र्युकः किति इत्यतः उकः इत्यस्यानुकर्षणं भवति। इडागमः सनः भवति न तु धातोः। अतः सनि इत्यस्य षष्ठ्यन्ततया विपरिणामः क्रियते। एवमेव ग्रहगुहोः इत्यस्य, उकः इत्यस्य च पञ्चम्यन्ततया विपरिणामः क्रियते। अङ्गस्य इत्यधिक्रियते तस्य उकः इति विशेषणम्। अतः तदन्तविधौ उगन्तात् अङ्गात् इत्यर्थो लभ्यते। एवञ्च ग्रह्–गुहधातुभ्यां तथा उगन्तादङ्गात् परस्य सनः इडागमो न भवतीति सूत्रार्थः। तथा च सूत्रेणानेन इडागमाभावो विधीयते।

उदाहरणम् – बुभूषति।

सूत्रार्थसमन्वयः – एवञ्च भूधातोः सनि भू स इति स्थिते भूधातुः उगन्तो वर्तते इति हेतोः प्रकृतसूत्रेण सनः इडागमो न भवति। ततः सन्यङोः इत्यनेन द्वित्वे हलादिशेषे ह्रस्वे च भु भू स इति जायते। ततः सार्वधातुकार्धधातुकयोः इत्यनेन आर्धधातुके गुणे प्राप्ते इको झल् इत्यनेन झलादिसनः कित्त्वात् क्ङिति च इत्यनेन गुणनिषेधो भवति। ततः अभ्यासे चर्च इत्यनेन अभ्यासस्य भकारस्य जश्त्वे आदेशप्रत्यययोः इत्यनेन सनः सकारस्य षत्वे बुभूष इति जायते। ततः तस्य सन्नन्तसमुदायस्य सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञायां लटि प्रथमपुरुषैकवचनविवक्षायां तिपि शपि पररूपे बुभूषति इति रूपं सिध्यति। बुभूषतः बुभूषन्ति इत्यादौ समानैव प्रक्रियास्ति इति ज्ञेयम्।

ग्रह्धातोः उदाहरणं जिघृक्षति। गुह्धातोः उदाहरणं जुघुक्षति।

इण् गतौ इति धातोः एतुमिच्छति इत्यर्थे सन्प्रत्यये इ स इति स्थिते सूत्रमिदमारभ्यते –

[२५.८] सनि च॥ (२.४.४७)

सूत्रार्थः – इणः गमिः स्यात् सनि, न तु बोधने।

सूत्रव्याख्या – विधिसूत्रमिदं द्विपदात्मकम्। सनि (७/१) च (अव्ययम्) इति सूत्रगतपदच्छेदः। इणो गा लुङि इत्यतः इणः इति पदस्य, णौ गमिरबोधने इत्यतः गमिः इति पदस्य, अबोधने इति पदस्य चानुवृत्तिर्भवति। तथा च इण्धातोः स्थाने गमि इत्ययमादेशो भवति सन्प्रत्यये परतः। किन्तु बोधनार्थे स आदेशो न भवति। गमि इत्यत्र इकार इत्संज्ञकः, अतः गम्मात्रमवशिष्यते। तथा च सूत्रेणानेन गमि इत्यादेशो विधीयते।

उदाहरणम् – जिगमिषति।

सूत्रार्थसमन्वयः – एवञ्च इण्धातोः सन्प्रत्यये इ स इति स्थिते प्रकृतसूत्रेण गमि इत्यादेशो भवति। यतो हि अत्र इण्धातुरस्ति किञ्च बोधनार्थोऽपि नास्ति। ततः अनुबन्धलोपे गम् स इति स्थिते गमेरिट् परस्मैपदेषु इत्यनेन सकाराद्यार्धातुकप्रत्ययस्य सनः इडागमे धातोः द्वित्वे हलादिशेषे अभ्यासजश्त्वे जगम् इस इति जायते। ततः सन्यतः इत्यनेन अभ्यास–अकारस्य इत्वे सनः सकारस्य षत्वे जिगमिष इति जाते ततः लटि प्रथमपुरुषैकवचनविवक्षायां तिपि शपि पररूपे जिगमिषति इति रूपं सिध्यति। एवमेव जिगमिषतः, जिगमिषन्ति इत्यादौ समाना प्रक्रिया।

प्रति–उपसर्गपूर्वकात् इण्धातोः सनि प्रतीषिषति इति यद्रूपं भवति तत्र इण्धातोः गमि इत्यादेशो न भवति। यतो हि अत्र बोधनार्थः अस्ति।

लेखितुमिच्छति इत्यर्थे लिख्धातोः सन्प्रत्यये सनः आर्धधातुकत्वात् आर्धधातुकस्येड्वलादेः इत्यनेन इडागमे लिख् इस इति स्थिते सन्यङोः इत्यनेन धातोर्द्वित्वे लिख् लिख् इस इति जायते। ततः हलादिशेषे अभ्यासह्रस्वे लि लिख् इस इति जाते लघूपधगुणे प्राप्ते तं बाधितुं सूत्रमिदमारभ्यते –

[२५.९] रलो व्युपधाद्धलादेः संश्च॥ (१.२.२६)

सूत्रार्थः – उश्च इश्च वी। ते उपधे यस्य तस्माद्धलादे रलन्तात्परौ क्त्वासनौ सेटौ वा कितौ स्तः।

सूत्रव्याख्या – अतिदेशसूत्रेऽस्मिन् पञ्च पदानि सन्ति। रलः (५/१) व्युपधात् (५/१) हलादेः (५/१) सन् (१/१) च (अव्ययम्) इति सूत्रगतपदच्छेदः। उश्च इश्च वी, ते उपधे यस्य स व्युपधः तस्मात् व्युपधात्, द्वन्द्वगर्भो बहुव्रीहिः। हल् आदिर्यस्य स हलादिः तस्माद् हलादेः, बहुव्रीहिः। नोपधात्फान्ताद्वा इत्यतः वा इत्यस्य , न क्त्वा सेट् इत्यतः सेट् इत्यस्य, असंयोगाल्लिट् कित् इत्यतः कित् इत्यस्य, पूङः क्त्वा च इत्यतः क्त्वा इत्यस्य चानुवृत्तिर्भवति। एवञ्च धातोः उपधायां यदि इकारः अथवा उकारो भवति, किञ्च धातोः अन्ते रल्प्रत्याहारस्थः कोऽपि वर्णः स्यात्, अपि च धातुः हलादिः स्यात्, किञ्च क्त्वः सनो वा इडागमो विहितो भवति चेत् तयोः क्त्वासनोः विकल्पेन कित्त्वं विधीयते इति सूत्रस्य सम्पूर्णार्थः। तथा च सूत्रेणानेन वैकल्पिकं कित्त्वं विधीयते।

उदाहरणम् –

इकारोपधस्य उदाहरणम् – लिलिखिषति, लिलेखिषति।

उकारोपधस्योदाहरणम् - रुरुचिषते , रुरोचिषते।

सूत्रार्थसमन्वयः – लिख अक्षरविन्यासे इति धातुः इकारोपधः, हलादिः, रलन्तः च अस्ति। अतः लिख् धातोः सनि द्वित्वादिकार्ये लि लिख् इस इति स्थिते प्रकृतसूत्रेण इस इत्यस्य विकल्पेन किद्वद्भावे लघूपधगुणनिषेधे लिलिखिस इति जायते। ततः आदेशप्रत्यययोः इत्यनेन सकारस्य षत्वे लि लिखिष इति भवति। ततः तस्य धातुसंज्ञायां लटि प्रथमपुरुषैकवचनविवक्षायां तिपि शपि लिलिखिषति इति रूपं भवति। कित्त्वाभावपक्षे तु लघूपधगुणो भवति। तदा लिलेखिषति इति रूपमपि भवति।

अधुना उकारोपधधातुविषये उच्यते। रुच दीप्तावभिप्रीतौ च इति धातुः आत्मनेपदी, उकारोपधः, हलादिः, रलन्तः च अस्ति। रोचितुमिच्छति इत्यर्थे रुच्धातोः सनि इडागमे धातोः द्वित्वे हलादिशेषे रुरुच् इस इति जाते प्रकृतसूत्रेण विकल्पेन किद्वद्भावे लघूपधगुणनिषेधे आदेशप्रत्यययोः इत्यनेन सकारस्य षत्वे रुरुचिष इति जायते। ततः धातुसंज्ञायां लटि प्रथमपुरुषैकवचनविवक्षायां तप्रत्यये शपि पररूपे रुरुचिषते इति रूपं सिध्यति। कित्त्वाभावपक्षे तु लघूपधगुणो भवत्येव । तदा रुरोचिषते इति रूपमपि भवति।

भेत्तुमिच्छति इत्यर्थे भिदिर् विदारणे इति धातोः सन्प्रत्यये भिद् स इति जायते। ततः अयं धातुः अनिट् अस्ति इति हेतोः इडागमो न भवति। ततः भिदः द्वित्वे हलादिशेषे अभ्यासजश्त्वादिकार्ये कृते सति बिभिद् स इति जायते। ततः सनः आर्धधातुकत्वात् लघूपधगुणे प्राप्ते अतिदेशसूत्रमिदमारभ्यते –

[२५.१०] हलन्ताच्च॥ (१.२.१०)

सूत्रार्थः – इक्समीपाद्धलः परो झलादिः सन् कित् स्यात्।

सूत्रव्याख्या – अतिदेशसूत्रमिदं पदद्वयात्मकम्। हलन्तात् (५/१) च इति सूत्रगतपदच्छेदः। इको झल् इति समग्रं सूत्रमनुवर्तते। किञ्च असंयोगाल्लिट् कित् इत्यतः कित् इत्यस्यानुवृत्तिर्भवति। अपि च रुदविदमुषग्रहिस्वपिप्रच्छः संश्च इत्यतः सन् इत्यस्यापि अनुवृत्तिर्भवति। तेन इकः समीपे विद्यमानात् हलः परः झलादिः सन् कित् भवति इति सूत्रार्थः। सूत्रे अन्तपदस्य समीपे इत्यर्थः। तथा च सूत्रेणानेन कित्त्वं विधीयते।

उदाहरणम् – बिभित्सति , बिभित्सते।

सूत्रार्थसमन्वयः – एवञ्च भिद् धातोः सन्प्रत्यये द्वित्वादिकार्ये कृते सति बिभिद् स इति स्थिते प्रकृतसूत्रेण झलादिसनः किद्वद्भावो भवति। यतो हि अत्र इक् अस्ति इकारः, तत्समीपवर्ती हल् भवति दकारः। ततः क्ङिति च इत्यनेन लघूपधगुणनिषेधो भवति, ततः खरि च इत्यनेन चर्त्वे बिभित्स इति जायते। ततः धातुसंज्ञायां लटि प्रथमपुरुषैकवचनविवक्षायां तिपि शपि पररूपैकादेशे बिभित्सति इति रूपं सिध्यति।

मूलधातुः उभयपदी अस्ति इति हेतोः सन्नन्तधातुरपि उभयपदी भवति। अतः पक्षे बिभित्सते इत्यपि भवति।

तुदादिगणीय–कृ–गॄ–धातुभ्यां इट् सनि वा इत्यनेन विकल्पेन इट् प्राप्तः किञ्च दृङ्–धृङ्–प्रच्छ–धातुभ्यः एकाच उपदेशेऽनुदात्तात् इत्यनेन आर्धधातुकस्य इण्निषेधः प्राप्तः। तदेतत् सर्वं बाधित्वा इडागमविधानार्थं सूत्रमिदमारभ्यते–

[२५.११] किरश्च पञ्चभ्यः॥ (७.२.७५)

सूत्रार्थः – कृ–गृ–दृङ्–धृङ्–प्रच्छधातुभ्यः विहितस्य सनः इडागमो भवति।

सूत्रव्याख्या – विधिसूत्रमिदं पदत्रयात्मकमस्ति। किरः (५/१) च पञ्चभ्यः (५/३) इति सूत्रगतपदच्छेदः। इडत्त्यर्तिव्ययतीनाम् इत्यतः इट् इत्यस्य, स्मिपूङ्रञ्ज्वशां सनि इत्यतः सनि इत्यस्य चानुवृत्तिर्भवति। एवञ्च कृ–गृ–दृङ्–धृङ्–प्रच्छधातुभ्यः विहितस्य सनः इडागमो भवति।

उदाहरणम् – जिगरिषति, जिगलिषति।

सूत्रार्थसमन्वयः – तथा च गरितुं गलितुं वा इच्छति इत्यर्थे गृ निगरणे धातोः सनि सनः आर्धधातुकत्वात् आर्धधातकस्येड्वलादेः इत्यनेन इडागमे प्राप्ते सनि ग्रहगुहोश्च इति तन्निषेधः प्राप्तः। पुनः तं बाधित्वा इट् सनि वा इत्यनेन विकल्पेन इटि प्राप्ते तमपि बाधित्वा किरश्च पञ्चभ्यः इत्यनेन नित्यम् इडागमो भवति। यतो हि अत्र कृधातुः अस्ति। किञ्च तस्माद्विहितः सन् अपि अस्ति। ततः गृ इत्यस्य द्वित्वे गृ गृ इस इति जाते उरत् इत्यनेन अभ्यासस्य ऋकारस्य अकारादेशे रपरत्वे ज गृ इस इति जाते वृतो वा इत्यनेन विकल्पेन इटः इकारस्य विकल्पेन दीर्घे प्राप्ते चास्येटो दीर्घत्वं नेच्छन्ति इति वचनात् तस्य बाधो भवति। ततः सार्वधातुकार्धधातुकयोः इत्यनेन ऋकारस्य गुणे जगर् इस इति जाते अभ्यासस्य अकारस्य इत्त्वे आदेशप्रत्यययोः इत्यनेन सकारस्य षत्वे जिगरिष इति जायते। ततः लटि प्रथमपुरुषैकवचनविवक्षायां तिपि शपि पररूपैकादेशे जिगरिषति इति रूपं सिध्यति । इटि परे सर्वत्र रेफस्य लत्वं विधीयते अचि विभाषा इति योगेन। अतः जिगलिषति इति रूपमपि सिध्यति।

एवमेव करितुम् (करीतुम्) इच्छति इत्यर्थे कृ-विक्षेपे इति धातोः सनादिकार्ये कृते सति चिकरिषति इति रूपमपि सिध्यति।

दृङ्धातोरुदाहरणम् - दिदरिषते - दर्तुमिच्छति इत्यर्थे दृङ् आदरे इति धातोः सनि इटि प्राप्ते एकाच उपदेशेऽनुदात्तात् इत्यनेन तन्निषेधः प्राप्तः। ततः किरश्च पञ्चभ्यः इत्यनेन नित्यं इडागमो भवति। ततः धातोः द्वित्वादिकार्ये सति दिदरिषते इति रूपं सिध्यति।

एवमेव धर्तुमिच्छति इत्यर्थे धृङ् अनवस्थाने इति धातोः सनादिकार्ये कृते सति दिधरिषते इति रूपं सिध्यति।

प्रच्छ ज्ञीप्सायामिति धातोः प्रष्टुमिच्छति इत्यर्थे सनि धातोः अनिट्त्वात् इटि अप्राप्ते किरश्च पञ्चभ्यः इति विशेषसूत्रेण नित्यम् इडागमे द्वित्वादिकार्ये च कृते सति पिपृच्छति इति रूपं सिध्यति।

अध्येतुम् इच्छति इत्यर्थे नित्यमधिपूर्वकात् इङ् अध्ययने इति अदादिगणीयधातोः धातोः कर्मणः समानकर्तृकादिच्छायां वा इति सनि इ स इति स्थिते अग्रिमसूत्रमिदमारभ्यते -

[२५.१२] इङश्च॥ (२.४.४८)

सूत्रार्थः – इङो गमिः स्यात् सनि।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। इङः (५.१) च इति सूत्रगतपदच्छेदः। णौ गमिरबोधने इत्यतः गमिः इत्यस्य , सनि च इत्यतः सनि इत्यस्य चानुवृत्तिर्भवति। तथा च सनि परे सति

इङ्धातोः स्थाने गमि इत्यादेशो भवति इति सूत्रार्थः। गमि इत्यत्र इकारस्य इत्संज्ञकत्वात् गम्मात्रमवशिष्यते।

उदाहरणम् – अधिजिगांसते।

सूत्रार्थसमन्वयः – एवञ्च नित्यमधिपूर्वकात् इङ् धातोः सनि इङश्च इत्यनेन गमि इत्यादेशे अनुबन्धलोपे अधि गम् स इति जायते। ततः अज्झनगमां सनि इत्यनेन उपधादीर्घे गाम् स इति जायते। ततः मूलधातुः ङित् अस्ति इति हेतोः अनुदात्तङित आत्मनेपदम् इत्यनेन स आत्मनेपदी भवति। फलतः पूर्ववत्सनः इत्यनेन सन्नन्तरूपमपि आत्मनेपदं भवति। ततः धातोः द्वित्वे हलादिशेषे अभ्यासह्रस्वे सन्यतः इत्यनेन अभ्यास–अकारस्य इत्त्वे मकारस्य अनुस्वारे अधि जिगांस इति स्थिते तप्रत्यये कृते सति अधिजिगांसते इति रूपं सिध्यति।

पाठगतप्रश्नाः-२

११. इङश्च इति सूत्रस्य कोऽर्थः।

१२. सनि च इत्यस्य कोऽर्थः।

१३. प्रष्टुमिच्छति इत्यर्थे प्रच्छधातोः सनि किं रूपं भवति।

१४. किरश्च पञ्चभ्यः इत्यनेन किं भवति।

१५. हलन्ताच्च इत्यनेन किं विधीयते।

१६. ग्रहधातोः सनि किम् उदाहरणम्।

१७. गुहधातोः सनि किम् उदाहरणम्।

१८. रलो व्युपधाद्धलादेः संश्च इत्येनन विधीयमानं कित्त्वं किं नित्यम् उत अनित्यम्।

तनितुम् इच्छति इत्यर्थे तनु विस्तारे इति उभयपदिनः धातोः सन्प्रत्यये तन् स इति स्थिते तनिपतिदरिद्रातिभ्यः सनो वा इड्वाच्यः इति वार्तिकेन विकल्पेन इट्पक्षे तन् इ स इति जाते धातोः द्वित्वे हलादिशेषे अभ्यासह्रस्वे अभ्यासाकारस्य इत्त्वे तितांस इति सन्नन्तरूपं भवति। ततः तस्य सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञायां लटि तिपि शपि पररूपैकादेशे तितनिषति इति रूपं जायते, तप्रत्यये तु तितनिषते इति रूपम्। यदा तु इडभावः तदा तन् स इति स्थिते सूत्रमिदमारभ्यते -

[२५.१३] तनोतेर्विभाषा॥ (६.४.१७)

सूत्रार्थः – तनोतेरुपधाया दीर्घो वा स्यात् झलादौ सनि।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। तनोतेः (५/१) विभाषा (अव्ययम्) इति सूत्रगतपदच्छेदः। नोपधायाः इत्यतः उपधायाः इत्यस्य अनुवृत्तिर्भवति, ढ्रलोपे पूर्वस्य दीर्घोऽणः इत्यतः

दीर्घः इत्यस्य, अज्झनगमां सनि इत्यतः सनि इत्यस्य चानुवृत्तिर्भवति। तथा च तन्धातोः उपधाया विकल्पेन दीर्घो भवति झलादौ सनि इति सूत्रार्थः।

उदाहरणम् – तितांसति, तितंसति।

सूत्रार्थसमन्वयः - एवञ्च तन्-धातोः सनि तन् स इति जाते तनोतेर्विभाषा इत्यनेन उपधाभूत-अकारस्य दीर्घे तान् स इति जायते। ततः धातोः द्वित्वे हलादिशेषे अभ्यासह्रस्वे अभ्यास-अकारस्य इत्त्वे तितान् स इति जाते नकारस्य नश्चापदान्तस्य झलि इत्यनेन नकारस्य अनुस्वारे तितांस इति जायते। ततः लटि तिपि शपि पररूपैकादेशे तितांसति इति रूपं भवति, तप्रत्यये तु तितांसते इति रूपं सिध्यति। दीर्घाभावपक्षे तु तन् स इति स्थिते द्वित्वादिकार्ये तितंस इति जायते। ततः लटि तिपि शपि पररूपैकादेशे तितंसति इति रूपं सिध्यति, तप्रत्यये तु तितंसते इति रूपम् इति साकल्येन षट् रूपाणि भवन्ति।

देवितुमिच्छति इत्यर्थे दिवु क्रीडाविजिगीषाव्यवहारस्तुतिमोदमदस्वप्नकान्तिगतिषु इति धातोः सनि दिव् स इति स्थिते सूत्रमिदमारभ्यते –

[२५.१४] सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्॥ (७.२.४९)

सूत्रार्थः – इवन्तेभ्य ऋधादिभ्यश्च सन इड् वा स्यात्।

सूत्रव्याख्या – विधिसूत्रमिदं पदद्वयात्मकमस्ति। सनि (७/१) इवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् (६/३) इति सूत्रगतपदच्छेदः। इव् अन्ते येषां ते इवन्ताः, इवन्ताश्च ऋधश्च भ्रस्जश्च दम्भुश्च श्रिश्च स्वृश्च युश्च ऊर्णुश्च भरश्च ज्ञपिश्च सन् च तेषामितरेतरयोगद्वन्द्वे इवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनः तेषां इवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्, बहुव्रीहिगर्भो द्वन्द्वः। सूत्रेऽस्मिन् स्वरतिसूतिसूयतिधूञूदितो वा इत्यतः वा इत्यस्य, इण्निष्ठायाम् इत्यतः इट् इत्यस्य चानुवृत्तिर्भवति। यस्य धातोः अन्ते इव् अस्ति स धातुः इवन्त इत्युच्यते यथा दिव् सिव् इत्यादि। तथा च इवन्तधातुभ्यः तथा ऋध्–भ्रस्ज्–दम्भ्–श्रि–स्वृ–यु–ऊर्णु–भर–ज्ञप्–सन्–धातुभ्यः परस्य सनः विकल्पेन इडागमो भवति इति सूत्रार्थः फलति। सूत्रेणानेन वैकल्पिकः इडागमो विधीयते। प्रकृतसूत्रेण यदा इट् न भवति। तदा हलन्ताच्च इत्यनेन किद्वद्भावात् गुणनिषेधो भवति इति विज्ञेयम्।

उदाहरणम् – अधुना क्रमश उदाहरणानि आलोच्यन्ते–

इवन्तः – दिव्धातोः सनि प्रकृतसूत्रेण वैकल्पिके इडागमे दिव् इस इति जाते दिव्धातोः द्वित्वे हलादिशेषे दिदिव् इस इति जायते। ततः लघूपधगुणे सनः सकारस्य षत्वे ततः लटि तिपि शपि पररूपैकादेशे दिदेविषति इति रूपं सिध्यति। इडभावपक्षे तु हलन्ताच्च इत्यनेन सनः किद्वद्भावात् गुणनिषेधे च्छ्वोः शूडनुनासिके च इत्यनेन धातोः वकारस्य ऊठादेशे दि ऊ स इति जाते इको यणचि इत्यनेन यणि अज्झनगमां सनि इत्यनेन दीर्घे द्यू स इति जायते। ततः द्यू इत्यस्य द्वित्वे हलादिशेषे अभ्यासस्य ऊकारस्य ह्रस्वे सकारस्य षत्वे तिबादिकार्ये कृते सति दुद्यूषति इति रूपं सिध्यति।

ऋध्धातोः उदाहरणम् - अर्धितुमिच्छति ईर्त्सति, अर्दिधिषति।

भ्रस्जधातोः उदाहरणम् - बिभ्रज्जिषति, बिभर्जिषति, बिभ्रक्षति, बिभर्क्षति।

दम्भधातोः उदाहरणम् - धिप्सति, धीप्सति, दिदम्भिषति।

श्रिधातोः उदाहरणम् - शिश्रीषति, शिश्रयिषति।

स्वृधातोः उदाहरणम् - सुस्वूर्षति, सिस्वरिषति।

युधातोः उदाहरणम् - युयूषति, यियविषति।

ऊर्णुधातोः उदाहरणम् - ऊर्णुनूषति, ऊर्णुनुविषति, ऊर्णुनविषति।

भृधातोः उदाहरणम् - बुभूर्षति, बिभरिषति।

ज्ञप्धातोः उदाहरणम् - ज्ञीप्सति, जिज्ञपयिषति।

सन्धातोः उदाहरणम् - सिषासति, सिसनिषति।

हलन्ताच्च इत्यनेन किद्वद्भावे गुणनिषेधे प्राप्ते तस्यापि निषेधार्थं सूत्रमिदमारभ्यते –

[२५.१५] मुचोऽकर्मकस्य गुणो वा॥ (७.४.५७)

सूत्रार्थः – सादौ सनि अकर्मकस्य मुच्धातोः विकल्पेन गुणो भवति।

सूत्रव्याख्या – विधिसूत्रमिदं पदचतुष्टयात्मकमस्ति। मुचः (६/१) अकर्मकस्य (६/१) गुणः (१/१) वा इति सूत्रगतपदच्छेदः। सः स्यार्धधातुके इत्यतः सि इत्यस्य, सनि मीमाघुरभलभशकपतपदामच इस् इत्यतः सनि इत्यस्य, सूत्रे गुणशब्दमुच्चार्य गुणो विधीयते। अतः इको गुणवृद्धी इति परिभाषाबलात् इकः इत्यस्योपस्थितिर्भवति। सकारादिः सन् इत्यस्य तात्पर्यं भवति इट्–रहितः सन्प्रत्ययः। एवञ्च अकर्मकस्य मुच्धातोः इकः विकल्पेन गुणो भवति सकारादौ सन्प्रत्यये परे इति सूत्रार्थः।

उदाहरणम् – मोक्षते, मुमुक्षते वा वत्सः स्वयमेव।

सूत्रार्थसमन्वयः – मुच्लृ मोक्षणे इति धातुः सकर्मकः अस्ति किन्तु कर्मकर्तृत्वात् अथवा कर्माविवक्षायाम् अयं धातुः अकर्मको भवति। एवञ्च मोक्तुमिच्छति स्वयमेव इत्यर्थे मुच्धातोः प्रकृतसूत्रेण विकल्पेन उकारस्य गुणे मोच् स इति भवति। यतो हि अत्र अकर्मकः मुच्धातुरस्ति अपि च सकारादिसन्प्रत्ययोऽस्ति। ततः धातोः द्वित्वे हलादिशेषे अभ्यासह्रस्वे अत्र लोपोऽभ्यासस्य इत्यनेन सम्पूर्णाभ्यासलोपे मोच् स इति जाते चोः कुः इत्यनेन कुत्वे सकारस्य षत्वे मोक्षः इति भवति । तस्य च सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञा भवति। कर्मकर्तृत्वात् धातुः स्वतः आत्मनेपदी अस्ति । एवञ्च पूर्वत्सनः इति नियमेन लटि तप्रत्यये शपि पररूपैकादेशे मोक्षते इति रूपं भवति। गुणाभावपक्षे मुमुक्षते इति रूपम् इत्येवं रूपद्वयं भवति।

हलन्ताच्च इत्यनेन रुद्–विद्–मुष्धातुभ्यः सनः कित्त्वे सिद्धे, रलो व्युपधाद्धलादेः संश्च इत्यनेन विकल्पेन कित्त्वे सिद्धे उभयोः बाधनार्थम् अर्थात् प्रतिप्रसवार्थमिदं सूत्रमारभ्यते।

किञ्च ग्रहधातोः न क्त्वा सेट् इत्यनेन प्राप्तनिषेधं बाधितुमग्रिमसूत्रं प्रवर्तते।

अपि च यद्यपि स्वप्–प्रच्छधातुभ्यां परस्य क्त्वः कित्त्वमस्ति तथापि सनः कित्त्वं नास्ति इति हेतोः अप्राप्तकित्त्वविधानार्थमिदं शास्त्रमारभ्यते–

[२५.१६] रुदविदमुषग्रहिस्वपिप्रच्छः संश्च॥ (१.२.८)।

सूत्रार्थः – रुद्–विद्–मुष्–ग्रह्–स्वप्–प्रच्छधातुभ्यः परौ सन् क्त्वा च कितौ स्तः।

सूत्रव्याख्या – अतिदेशसूत्रमिदं पदत्रयात्मकमस्ति। रुदविदमुषग्रहिस्वपिप्रच्छः (५/१) सन् (१/१) च इति सूत्रगतपदच्छेदः। रुषश्च विदश्च मुषश्च ग्रहिश्च स्वपिश्च प्रच्छ् च तेषां समाहारद्वन्द्वे रुदविदमुषग्रहिस्वपिप्रच्छ्, तस्मात् रुदविदमुषग्रहिस्वपिप्रच्छः। चकारः समुच्चयार्थः। पूर्वसूत्रात् अर्थात् मृडमृदगुधकुषक्लिशवदवसः क्त्वा इत्यतः क्त्वा इत्यस्य समुच्चयः। असंयोगाल्लिट् कित् इत्यतः कित् इत्यस्यानुवृत्तिर्भवति। तथा च पूर्वोक्तः सूत्रार्थः सिध्यति। एवञ्च सूत्रेणानेन कित्त्वं विधीयते।

उदाहरणम् – रुरुदिषति।

सूत्रार्थसमन्वयः – रोदितुम् इच्छति इत्यर्थे रुदिर् अश्रुविमोचने इति धातोः सनि इडागमे रुदः द्वित्वे हलादिशेषे रु रुद् इस इति जायते। ततः सन्यतः इत्यनेन अभ्यासस्य अकारस्य इत्त्वे रु रुद् इस इति जाते सनः आर्धधातुकत्वात् तदागमस्यापि यदागमास्तद्गुणीभूतास्तद्ग्रहणेन गृह्यन्ते इति परिभाषया आर्धधातुकत्वमस्ति इति हेतोः पुगन्तलघूपधस्य च इत्यनेन गुणे प्राप्ते प्रकृतसूत्रेण सनः किद्वद्भावे क्ङिति च इति गुणनिषेधो भवति। ततः आदेशप्रत्यययोः इत्यनेन सकारस्य षत्वे रुरुदिष इति जायते तस्य च रुरुदिष इति समुदायस्य सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञायां लटि प्रथमपुरुषैकवचनविवक्षायां तिपि शपि पररूपैकादेशे रुरुदिषति इति रूपं सिध्यति।

एवमेव वेदितुं वेत्तुम् वा इच्छति इत्यर्थे विद्धातोः सनि विविदिषति, मोषितुमिच्छति इत्यर्थे मुष स्तेये इति धातोः सनि मुमुषिषति इत्युभयत्रापि बोध्यम्।

ग्रहीतुमिच्छति इत्यर्थे ग्रह उपादाने इति धातोः सनि जिघृक्षति इति रूपं भवति। अत्र सनः किद्वद्भावस्य फलं ग्रहिज्यावयिव्यधिवष्टिविचतिवृश्चतिपृच्छतिभृज्जतीनां ङिति च इति रेफस्य सम्प्रसारणम्।

स्वप्तुमिच्छति इत्यर्थे ञि ष्वप शये धातोः सनि सुषुप्सति इति रूपं भवति। अत्र सनः कित्त्वस्य फलं तावत् वचिस्वपियजादीनां किति इत्यनेन वकारस्य सम्प्रसारणं भवति।

अधुना भवतां बोधसौकर्याय लटि कानिचित् सन्नन्तरूपाणि अधः तालिकया प्रदर्श्यन्ते-

धातुः	सन्नन्तार्थः	सामान्यरूपाणि	लटि सन्नन्तरूपाणि
अर्च्	पूजने की इच्छा करना	अर्चति	अर्चिचिषति
आप्	पाने की इच्छा करना	आप्नोति	ईप्सति
अधि-इङ्	पढने की इच्छा करना	अधीते	अधिजिगांसते
कथ्	कहने की इच्छा करना	कथयति	चिकथयिषति-ते

कृ	करने की इच्छा करना	करोति	चिकीर्षति
खाद्	खाने की इच्छा करना	खादति	चिखादिषति
गम्	जाने की इच्छा करना	गच्छति	जिगमिषति
गृ	निगलने की इच्छा करना	गिरति, गिलति	जिगरिषति, जिगलिषति
ग्रह्	ग्रहण करने की इच्छा करना	गृह्णाति	जिघृक्षति-ते
घ्रा	सूँघने की इच्छा करना	जिघ्रति	जिघ्रासति
चल्	चलने की इच्छा करना	चलति	चिचलिषति
चि	चयन करने की इच्छा करना	चिनोति	चिचीषति
छिद्	काटने की इच्छा करना	छिनत्ति	चिच्छित्सति-ते
चुर्	चुराने की इच्छा करना	चोरयति	चुचोरयिषति-ते
जि	जीतने की इच्छा करना	जयति	जिगीषते
ज्ञा	जानने की इच्छा करना	जानाति	जिज्ञासते
तृ	तरने की इच्छा करना	तरति	तितीर्षति
दृश्	देखने की इच्छा करना	पश्यति	दिदृक्षते
पच्	पकाने की इच्छा करना	पचति	पिपक्षति-ते
पा	पीने की इच्छा करना	पिबति	पिपासति
बुध्	जानने की इच्छा करना	बुध्यते	बुभुत्सते
भुज्	खाने की इच्छा करना	भुङ्क्ते	बुभुक्षते
भू	होने की इच्छा करना	भवति	बूभूषति
मुच्	छुटने की इच्छा करना	मुञ्चते	मुमुक्षते
मृ	मरनेकी इच्छा करना	म्रियते	मुमूर्षते
लभ्	पाने की इच्छा करना	लभते	लिप्सते

पाठगतप्रश्नाः-३

१९. तन्धातोः सनि कति रूपाणि कानि च तानि।

२०. स्वप्तुमिच्छति इत्यर्थे स्वप्धातोः सनि किं रूपम्

२१. रुदविदमुषग्रहिस्वपिप्रच्छः संश्च इत्यनेन किं विधीयते।

२२. रुरुदिषति इत्यस्य कोऽर्थः।

२३. सनीवन्तादिसूत्रं पूरयत।

२४. एतुमिच्छति इत्यर्थे इधातोः सनि किं रूपम्।

२५. सनि च इति कीदृशं सूत्रम्। अतिदेशसूत्रं विधिसूत्रं वा।

पाठसारः

भ्वादितः चुरादिं यावत् ये दशगणीया धातवो वर्तन्ते तेभ्यो धातुभ्यः इच्छार्थे सन्प्रत्ययो भवति। तदा तस्य सन्नन्तशब्दस्य सनाद्यन्ता धातव (३.१.३२) इत्यनेन धातुसंज्ञा भवति। यथा पठ् व्यक्तायां वाचि इति मूलधातोः सनि पिपठिषति इति रूपं भवति। अत्र पिपठिष इत्यस्य धातुसंज्ञा। मूलस्य पठ् इत्यस्य तु भूवादयो धातव (१.३.१) इत्यनेन धातुसंज्ञा भवति इति विशेषः ज्ञेयः। सनि परे अथवा सनः नानाविधानि कार्याणि सन्ति। यथा इगन्तधातोः परस्य झलादिसन्प्रत्ययस्य किद्वद्भावो भवति तेन चिकीर्षति इत्यादौ गुणनिषेधः। क्वचित् सनः इडागमो न भवति तेन जुघुक्षति , जिघृक्षति इत्यादौ न गुणः। अकर्मकस्य मुच्धातोः इकः विकल्पेन गुणो भवति सकारादौ सन्प्रत्यये परे तेन मोक्षते, मुमुक्षते वा वत्सः स्वयमेव इति सिध्यति। तन्धातोः उपधाया दीर्घो वा स्यात् झलादौ सनि तेन तितांसति, तितंसति, तितनिषति इति रूपत्रयं सिध्यति। गत्यर्थे इण्धातोः गमिरादेशः स्यात् सनि स्यात् न तु बोधने इत्युच्यते तेन जिगमिषति इति रूपं सिध्यति। किञ्च इङ्धातोः स्थाने गमि इत्यादेशे अधिजिगांसते इति रूपं सिध्यति। तत्र भवतां प्रक्रियासौकर्याय पठितुम् इच्छति इति विग्रहे पठ्धातोः सनि पिपठिषति इति रूपनिष्पत्तिः कथं भवति इत्येतत् सर्वमत्र स्पष्टमालोचितमस्ति।

पाठान्तप्रश्नाः

१. सनाद्यन्ता धातव इति सूत्रं व्याख्यात।

२. पिपठिषति इति सन्नन्तधातुरूपसिद्धिः कथं भवति इति व्याख्यात।

३. धातोः कर्मणः समानकर्तृकादिच्छायां वा इति सूत्रं सोदाहरणं व्याख्यात।

४. अधिजिगांसते इति सन्नन्तधातुरूपं सोदाहरणं व्याख्यात।

५. सनि ग्रहगुहोश्च इति सूत्रं सोदाहरणं व्याख्यात।

६. रलो व्युपधाद्धलादेः संश्च इति सूत्रं व्याख्यात।

७. किरश्च पञ्चभ्यः इति सूत्रस्थानि उदाहरणानि व्याख्येयानि।

८. सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम् इति सूत्रं व्याख्यात।

९. मुचोऽकर्मकस्य गुणो वा इति सूत्रं सोदाहरणं व्याख्यात।

१०. रुदविदमुषग्रहिस्वपिप्रच्छः संश्च इति सूत्रं सोदाहरणं व्याख्यात।

पाठगतप्रश्नोत्तराणि

उत्तराणि–१

१. मूलधातुः-पठ्, सन्नन्तधातुः-पिपठिष।

२. सनाद्यन्ता धातवः।

३. इच्छार्थे।

४. न।

५. पठितुम् इच्छति।

६. जिघत्सति।

७. अज्झनगमां सनि।

८. गुणनिषेधः।

९. सन्-क्यच्-काम्यच्-क्यङ्-क्यषोऽथाचारक्विब्-णिज्-यङौ तथा।
यगायेयङ्–णिङ् चेति द्वादशाऽमी सनादयः।।

१०. बुभूषति।

उत्तराणि–२

११. सनि परे सति इङ्धातोः स्थाने गमि इत्यादेशो भवति इत्यर्थः।

१२. इण्धातोः स्थाने गमि इत्यादेशो भवति सन्प्रत्यये परे सति। न तु बोधनार्थे।

१३. पिपृच्छति।

१४. इडागमो भवति।

१५. किद्वद्भावः।

१६. जिघृक्षति।

१७. जुघुक्षति।

१८. अनित्यम्।

उत्तराणि-३

१९. तितांसति, तितंसति, तितनिषति इति रूपत्रयम्।

२०. सुषुप्सति।

२१. सन्-क्त्वा इत्यनयोः कित्त्वम्।

२२. रोदितुमिच्छति।

२३. सनीवन्तर्धभ्रस्जदम्भुश्रिस्वृयूर्णुभरज्ञपिसनाम्।

२४. जिगमिषति।

२५. विधिसूत्रम्।

॥इति पञ्चविंशः पाठः ॥